# Jagadadishakti Stotram

# जगदादिशक्तिस्तोत्रम्

## Document Information

Text title : Jagadadi Shakti Stotram

File name : jagadAdishaktistotram.itx

Category : devii

Location : doc_devii

Author : Acharya Pandit ShriRam Kishor Mishra

Transliterated by : Manjeet Gupta

Proofread by : Manjeet Gupta, PSA Easwaran

Latest update : May 24, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# जगदादिशक्तिस्तोत्रम्

देवीं नमामि शिरसा जगदादिशक्तिं
कात्यायनीं भगवतीं सुखदां च दुर्गाम् ।
या हन्ति राक्षसगणान् युधि भद्रकाली
सा पातु मां भगवती गिरिजा कराली ॥ १॥

माहेश्वरी त्वमसि वैष्णवी नारसिंही
ब्राह्मी त्वमेव ललिता सुरसुन्दरी त्वम् ।
वाराहि षोडशि करालि शुभे त्वमैन्द्री
कौमारि भैरवि जये सततं नमस्ते ॥ २॥

शैले वने वसति यो वनराजसिंह
आरुह्य तं भ्रमति दुर्गमपर्वतेषु ।
ग्रामेषु या च नगरेषु च मन्दिरेषु
सा पातु मां भगवती जगदादिशक्तिः ॥ ३॥

या क्वापि लोकजननी प्रथिता भवानी
या सर्वमङ्गलयुता च शुभा मृडाणि ।
तां चण्डिकां हतखलामधुना स्मरामि
तां कालिकां भगवतीं शिरसा नमामि ॥ ४॥

ज्वालामुखी त्वमसि भानुमुखी प्रभा त्व-
मुल्कामुखी रविमुखी वडवामुखी त्वम् ।
कण्ठे निजे धरति या रिपु मुण्डमालां
सा पातु मां भगवती जगदादिशक्तिः ॥ ५॥

अष्टादशापि च भुजाः प्रभवन्ति यस्याः
या पूज्यते दशभुजा क्वचनाष्टहस्ता ।
या दैत्यशुम्भ-महिषासुर-मर्दिनी च
तां चण्डिकां भगवतीं प्रणमामि दुर्गाम् ॥ ६॥

मातङ्गिनी त्वमसि भूतभयङ्करी त्वं
श्रीकालिकासि रिपुहा जगदम्बिकासि ।
वैरोचिनी त्वमसि कालजया तमिस्त्रा
त्वं डाकिनी  यमनिशासि नमोऽस्तु तुभ्यम् ॥ ७॥

भीमाकृते त्रिपुरसुन्दरि राक्षसघ्ने
ताराऽऽकृते त्रिपुरभैरवि कालवह्ने ।
घोराकृते त्रिगुणदे त्रिपुरारिवन्द्ये
धूमाकृते भुवनजीवनदे नमस्ते ॥ ८॥

काल्यै नमोऽस्तु सततं जगदम्बिकायै
देव्यै नमोऽस्तु हरिणाधिपवाहनायै ।
तेजः प्रभाकिरणभूषितमस्तकायै
तस्यै नमोऽस्तु सततं जगदादिशक्त्यै ॥ ९॥

योत्पत्तिपालनकरी जगती जनानां
गन्धर्वकिन्नरसुरार्चितपादपद्मा ।
शर्वप्रिया प्रियशिवा शिवदा शिवानी
सा पातु मां भगवती गिरिजा भवानी ॥ १०॥

या शाङ्करी भगवती वृषवाहनस्था
तां मोक्षदां शिवकरीं हृदये भजामि ।
शङ्खत्रिशूलहलचक्रगदाऽऽयुधा या
सा पातु मां भगवती जगदादिशक्तिः ॥ ११॥

इति श्रीरामकिशोरमिश्रविरचितं जगदादिशक्तिस्तोत्रं सम्पूर्णम् ।

*Jagadadishakti Stotram*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*